# Lakshmikritam Shri Krishna Stotram

# લક્ષ્મીકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Lakshmikritam Shri Krishna Stotram

File name : lakShmIkRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, lakShmI, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 120/60-162||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# લક્ષ્મીકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

લક્ષ્મીસ્તદા પૃથગ્ભૂત્વા સાધ્વી કાષાયધારિણી ।
અસ્તૌત્સ્વામિસ્વરૂપં શ્રીપરબ્રહ્મપ્રહંસકમ્ ॥ ૬૦॥

ૐ નમઃ શ્રીપરબ્રહ્મ તે નમઃ પરમાત્મને ।
બ્રહ્મમુક્તાધિપતયે પરધામનિવાસિને ॥ ૬૧॥

અપૃથઙ્મુક્તસંસ્થાય રહસ્યમુક્તસેવિને ।
નમસ્તે શ્રીરઙ્ગમહોલાદિવાસાય યોગિને ॥ ૬૨॥

નિર્લેપાય મહામુક્તાઽનાદિમુક્તાદિસેવિને ।
અક્ષરૈર્મુક્તવૃન્દૈશ્ચ સેવિતાય ચ તે નમઃ ॥ ૬૩॥

અવતારૈરીશ્વરાદ્યૈઃ સેવિતાય ચ તે નમઃ ।
ઋષિપિતૃસુરાદ્યૈશ્ચ સેવિતાય ચ તે નમઃ ॥ ૬૪॥

માનવૈશ્ચેતરૈશ્ચાપિ યક્ષગન્ધર્વકિન્નરૈઃ ।
નાગૈઃ સર્પૈ રાક્ષસૈશ્ચ સેવિતાય ચ તે નમઃ ॥ ૬૫॥

ઉદ્ભિજ્જજરાસ્વેદજૈશ્ચ પ્રસેવિતાય તે નમઃ ।
નરૈશ્ચ પ્રમદાભિશ્ચ સર્વસ્થાવરજઙ્ગમૈઃ ॥ ૬૬॥

પુષ્ટ્યર્થં સંસેવિતાય સુખદાય ચ તે નમઃ ।
અસઙ્ખ્યયોગિનાં કામપૂરકાય ચ તે નમઃ ॥ ૬૭॥

અસઙ્ખ્યાનાં સ્વભક્તાનાં તારકાય ચ તે નમઃ ।
માણિક્યાયા બદર્યાશ્ચ નાથાય તે નમો નમઃ ॥ ૬૮॥

બદરો નામ રાજર્ષિર્વ્યધાદ્બદરિકાશ્રમમ્ ।
યત્કૃપાંઽશાત્સ્વામિનં તં વન્દે બદરિકેશ્વરમ્ ॥ ૬૯॥

હેમાનલાસુરો યેન પર્વતાધો નિષૂદિતઃ ।
તસ્ય બદરનૃપતેઃ પ્રસન્નાય ચ તે નમઃ ॥ ૭૦॥

બદરીસ્વીયમૂલાધો હેમાનલમમર્દયત્ ।
યત્પ્રતાપેન તં કૃષ્ણં નતાઽસ્મિ સાધુરૂપિણમ્ ॥ ૭૧॥

બદરો રસારૂપોઽપિ યત્કૃપાતો વ્યજાયત ।
ફલે તં પરમાત્માનં વન્દે શ્રીસ્વામિનં ત્વિહ ॥ ૭૨॥

નરોઽપિ બીજતાં પ્રાપ્તો બદરાખ્યે ફલે સદા ।
યત્કૃપાતસ્તં ફલેશં વન્દે શ્રીસ્વામિનં પ્રભુમ્ ॥ ૭૩॥

શ્રીશીલસ્ય તુ વિપ્રસ્ય પ્રેતભૂતસ્ય મોક્ષણમ્ ।
બદરસ્ય પ્રદાનેન કૃતં યેન ચ તે નમઃ ॥ ૭૪॥

સાધુસાધ્વીસ્વરૂપાભ્યાં દારાભાગ્યાય દર્શનમ્ ।
દત્વાઽપ્યમોક્ષયદ્ભૂપં તં યસ્તસ્મૈ ચ તે નમઃ ॥ ૭૫॥

બ્રહ્મદેવદ્વિજપત્ન્યૈ દત્વા દ્વે બદરે ફલે ।
બદ્રિકા પુત્રિકાપુત્રૌ દદૌ બદ્રીશ તે નમઃ ॥ ૭૬॥

યત્પ્રતાપાત્ કૃષ્ણપત્ની જાતા વૈ બાલયોગિની ।
સુરેશ્વરીસુતા તં શ્રીકૃષ્ણં વન્દે નરાયણમ્ ॥ ૭૭॥

યઃ કૃષ્ણો દિવ્યદેહાં ચ ચારણીં નાગ્નકેસરીમ્ ।
કૃત્વા મુક્તાનિકાં નિન્યેઽક્ષરં તસ્મૈ નમો નમઃ ॥ ૭૮॥

નર્મકર્ત્રીં વિનોદિન્યાઃ સાધુયોગેન મોક્ષણમ્ ।
કૃતં યેન કૃતો દેવલોકોઽપિ ચ સખીવિધઃ ॥ ૭૯॥

મોક્ષં તસ્મૈ દદૌ યશ્ચ તસ્મૈ તે સ્વામિને નમઃ ।
બાહુલકાય તત્પત્ન્યૈ લીલાવત્યૈ ચ નર્તનાત્ ॥ ૮૦॥

દદૌ બ્રહ્મરસં મોક્ષં તુષ્ટો યસ્તે નમઃ સદા ।
માલિયાનં મલ્લિકાં ચ માલાકારૌ હરિઃ પુરા ॥ ૮૧॥

પ્રસન્નઃ પાયયામાસ બ્રહ્મરસં તતસ્તયોઃ ।
મોક્ષણં કૃતવાન્ કૃષ્ણો યસ્તસ્મૈ સ્વામિને નમઃ ॥ ૮૨॥

નિકામદેવસંજ્ઞાય ધીશૂરાય હરિઃ સ્વયમ્ ।
મોક્ષં દદૌ ચ તત્પત્ન્યૈ તસ્મૈ શ્રીસ્વામિને નમઃ ॥ ૮૩॥

નિગડભ્રામકૈવર્તં મત્સ્યાશાપાત્ સુદુઃખિનમ્ ।
તારિતં ભક્તયા પત્ન્યા યસ્ય કૃપાદિશેવધેઃ ॥ ૮૪॥

અનયઃ સ્વં પરં ધામ તયા સાકં ચ યોષિતા ।
તથા તત્પુત્રિકા ચાદ્યા સાધ્વી પુણ્ડરિકા સતી ॥ ૮૫॥

નિર્વાણિકા સતી ચાન્યાઽઽનન્દઘના તૃતીયકા ।
તથા પઞ્ચાત્મજા જ્ઞાનદર્ભ્યાદયોઽપિ યં પ્રભુમ્ ॥ ૮૬॥

ભજિત્વા મોક્ષણં પ્રાપ્તાસ્તં ભજે સ્વામિનં હરિમ્ ।
કૃતઘ્નાસ્તુ કુથલ્યાખ્યસ્ત્રિયા યો રાજયક્ષ્મતઃ ॥ ૮૭॥

રક્ષાં ચક્રે દદૌ મોક્ષં તં વન્દે સ્વામિનં પ્રભુમ્ ।
પ્રતારણ્યા વિષલાણ્યાઃ સતાં સમાગમાદ્ધરિઃ ॥ ૮૮॥

ઉદ્ધારં કૃતવાન્ યસ્તં વન્દે શ્રીસ્વામિનં પ્રભુમ્ ।
ગઙ્ગાંઽજનીં કટકર્ત્રીં સત્સઙ્ગેન ત્વમોક્ષયત્ ॥ ૮૯॥

રમાઞ્જનીં રમાં ચક્રે યસ્તસ્મૈ હરયે નમઃ ।
સુનારિણીં કુલાલીં ચ રણસ્તમ્બં ચ તત્પતિમ્ ॥ ૯૦॥

સાધુયોગેન તત્પુત્રં સંસારાદ્યો વ્યમોચયત્ ।
વન્દે તં સ્વામિનં કૃષ્ણં વલ્લભં પ્રભુમીશ્વરમ્ ॥ ૯૧॥

સ્વર્ણકારસ્ત્રિયા હેમસુધાયાસ્તુ પ્રભક્તિતઃ ।
પ્રસન્નો યો દદૌ તસ્યૈ ચાઽન્નપૂર્ણાત્વમુત્તમમ્ ॥ ૯૨॥

મુક્તિં દદૌ તથાઽન્તે ચ વન્દે શ્રીસ્વામિનં હરિમ્ ।
રાધિકાયનયોગેન વિદ્રુમિણીં તુ વિષ્ટિણીમ્ ॥ ૯૩॥

ધામ્નિ રાધાસમાં ચક્રે યસ્તસ્મૈ સ્વામિને નમઃ ।
શ્વપચીં માલવાનીં યો ધર્મયોગેન મુક્તિગામ્ ॥ ૯૪॥

સકુટુમ્બામકરોદ્યસ્તસ્મૈ શ્રીસ્વામિને નમઃ ।
રથ્યામાર્જનિકાં કારેલિકાં હિતાઞ્જલેર્મુનેઃ ॥ ૯૫॥

યોગાત્ કથાશ્રવણેન મુક્તિમનયદ્યઃ પ્રભુઃ ।
હેતાઞ્જલેશ્ચ પુત્રીણાં નિર્મોહિત્વં ચ યદ્બલાત્ ॥ ૯૬॥

મોક્ષણં કૃતવાન્ યશ્ચ તસ્મૈ તેઽસ્તુ નમો મુહુઃ ।
નિરઞ્જનાદયશ્ચાપિ ભ્રાતરઃ પઞ્ચ તાદૃશાઃ ॥ ૯૭॥

મુક્તિં યેન પ્રણીતાસ્તં વન્દે શ્રીસ્વામિનં પ્રભુમ્ ।

યન્ત્રકર્ત્રીં ગોમતીં ચ નયરાજં ચ તત્પતિમ્ ॥ ૯૮॥

અરક્ષયદ્રાજયક્ષ્મતો યસ્તં સ્તૌમિ માવરમ્ ।
કનકાઙ્ગદાયાઃ કૃષ્ણો ધૂર્તાયા મોક્ષણં વ્યધાત્ ॥ ૯૯॥

ભાણવાણ્યા ધૂતકર્ત્ર્યાઃ શ્રેયશ્ચકાર યો હરિઃ ।
રાયહરિનૃપસ્યાઽપિ તં વન્દે સ્વામિનં પ્રભુમ્ ॥ ૧૦૦॥

માધવરાયનૃપતેઃ શ્રેયો વ્યધાત્તુ યઃ પ્રભુઃ ।
વૈદ્યોતિકાં તુ કંસારીં દિવ્યામમોક્ષયચ્ચ યઃ ॥ ૧૦૧॥

નરરાજં કુમ્ભકારં તદ્ભાર્યાં રત્નિકાં ચ યઃ ।
અમ્બાલિકાં સ્વર્ણકર્ત્રીં ધાતુધ્માં ચ વિનોદિનીમ્ ॥ ૧૦૨॥

અમોક્ષયદ્ધરિર્યશ્ચ નટં રઞ્જનકોવિદમ્ ।
શ્રીરામસુન્દરં ચાપિ કદર્યં યોઽપ્યમોક્ષયત્ ॥ ૧૦૩॥

વન્દે તં પરમાત્માનં સ્વામિનં દીક્ષિતં પ્રભુમ્ ।
ક્ષીરોદવીરં ભૂપં ચ રાજ્ઞીં રુહારિણીં ચ યઃ ॥ ૧૦૪॥

ગણિકાં સોમિકાં પઞ્ચપુત્રીયુતામમોક્ષયત્ ।
અરુણાનીપતિં પાટલાન્ચાદીશં નમામિ તમ્ ॥ ૧૦૯॥

મદ્યપાયા લિયાર્યાશ્ચ મોક્ષણં યો વ્યધાત્ પ્રભુઃ ।
મિષ્ટાસવધ્વજિનશ્ચ તં વન્દે સ્વામિનં હરિમ્ ॥ ૧૦૬॥

ગણ્ડવાતાભિધાયાશ્ચ ચક્રિણ્યા મોક્ષણં વ્યધાત્ ।
યાસ્કવાદસ્ય ચ મોક્ષં તં વન્દે સ્વામિનં હરિમ્ ॥ ૧૦૭॥

નિન્દાકર્ત્ર્યા દ્વિર્વદન્ત્યા મોક્ષણં યો વ્યધાત્પ્રભુઃ ।
દ્વિર્ગર્જનાખ્યપત્યુશ્ચ તં વન્દે સ્વામિનં હરિમ્ ॥ ૧૦૮॥

સુરપ્રસાદં વિપ્રં ચ ગુરુઘ્નં યો હ્યમોચયત્ ।
માતરં પિતરં તસ્ય ચાઽમોક્ષયત્તુ યઃ પ્રભુઃ ॥ ૧૦૯॥

નાગવિક્રમભૂપસ્ય દેવદ્રોહરતસ્ય ચ ।
નવદ્રોહિયુતસ્યાઽપિ મોક્ષકર્ત્રે તુ તે નમઃ ॥ ૧૧૦॥

શાલમિત્રો જીવિકાઘ્નો જયાલક્ષ્મીશ્ચ તત્પ્રિયા ।
ઉદ્ધૃતૌ યેન કૃષ્ણેન તસ્મૈ શ્રીસ્વામિને નમઃ ॥ ૧૧૧॥

કન્યાદ્યં યદ્દુરાજં યો વિષદં સાધુયોગતઃ ।
અમોચયદ્યમદૂતાત્ તં ભજે સ્વામિનં હરિમ્ ॥ ૧૧૨॥

સાધુજીવં કુમારં ચ કુમારીં સાધુજીવનીમ્ ।
નિર્વિષાદં ચ યઃ કૃષ્ણોઽમોક્ષયત્ તં મુહુર્નમઃ ॥ ૧૧૩॥

નારાયણ્યૈ પ્રભાવત્યૈ ઘટમાલાખ્યયોષિતે ।
મોક્ષણં પ્રદદૌ યશ્ચ તસ્મૈ શ્રીસ્વામિને નમઃ ॥ ૧૧૪॥

અનઙ્ગવલ્લ્યાઃ કુટ્ટન્યાસ્તત્સખીનાં ચ મોક્ષણમ્ ।
કૃતવાન્ યઃ પ્રભુઃ સ્વામી તસ્મૈ કૃષ્ણાય તે નમઃ ॥ ૧૧૫॥

ષણ્ઢવજાભિધં ષણ્ઢં યઃ સંસારાદ્વ્યમોચયત્ ।
નપુંસકાનાં પુંસ્ત્રીત્વં ચક્રે યસ્તે નમો મુહુઃ ॥ ૧૧૬॥

યવસન્ધં તુ માંસાદં પત્નીં મજાવલીં ચ યઃ ।
તત્કુટુમ્બં હરિર્વ્યમોચયત્તસ્મૈ ચ તે નમઃ ॥ ૧૧૭॥

ભાણ્ડં યો ભણ્ડશીલં તુ સકુટુમ્બં વ્યમોચયત્ ।
ત્રિગાલવાઁસ્તથા ભવાયનાદીન્ યો વ્યમોચયત્ ॥ ૧૧૮॥

હરિવીર્યાદિમલ્લાઁશ્ચામોક્ષયદ્યઃ પ્રભુર્હરિઃ ।
વાર્ધૂષિકાન્ હરિલાલાદીંશ્ચ વ્યમોક્ષયત્તુ યઃ ॥ ૧૧૯॥

કીરવણાદિમૃગયૂમમોક્ષયચ્ચ યઃ પ્રભુઃ ।
અમોક્ષયચ્ચ નાગાદં વાદિટં યશ્ચ તે નમઃ ॥ ૧૨૦॥

સારહાસીયમાર્તણ્ડમણ્ડલાદિપ્રમોક્ષકમ્ ।
વિલાસદેવં લુચ્ચાદં વ્યમોક્ષયચ્ચ તં ભજે ॥ ૧૨૧॥

દૈવાન્ પ્રકાશકાદીંશ્ચ તત્પુત્રાન્ સાધુદીક્ષિતાન્ ।
મૌક્તિકાયનિકાદ્યાશ્ચ તત્પુત્રીઃ સાધ્વિકાસ્તથા ॥ ૧૨૨॥

વ્યમોક્ષયચ્ચ યઃ સ્વામી વન્દે શ્રીસ્વામિનં ચ તમ્ ।
દુરિતઘોષનામાનં સર્વાદં યો વ્યમોક્ષયત્ ॥ ૧૨૩॥

તત્પત્નીં ચ મહાસત્યાયનીં વ્યમોક્ષયચ્ચ યઃ ।
તત્પુત્રાન્ તત્પુત્રિકાશ્ચાઽમોક્ષયદ્યશ્ચ તં ભજે ॥ ૧૨૪॥

ધર્મભટં મહામાત્યં શીલયાનીં ચ તત્પ્રિયામ્ ।
અમોક્ષયત્ પ્રભુર્યઃ શ્રીસ્વામિનં તં સદા ભજે ॥ ૧૨૫॥

ધર્માધ્યક્ષં પ્રભુર્મુકુન્દસાવિત્રમમોક્ષયત્ ।
ન્યાયાક્ષિણીં ચ તદ્ભાર્યાં યસ્તં વન્દે જનાર્દનમ્ ॥ ૧૨૬॥

વિશાલરેખકં યશ્ચૌદ્ધારયલ્લેખકં હરિઃ ।
શુચિકાન્તાં ચ તત્પત્નીં તં વન્દે સ્વામિનં પ્રભુમ્ ॥ ૧૨૭॥

કૃષ્ણકાન્તેશ્વરોનાથં નમામિ વલ્લભં પ્રભુમ્ ।
કાયસ્થાન્ કરણાધાન્ યોઽમોક્ષયત્પરમેશ્વરઃ ॥ ૧૨૮॥

શાહવિલાપનાદીંશ્ચાઽમોક્ષયત્તં નમામિ ચ ।
ગૃધ્ર ઉદ્ધારિતો યેન પૂર્વકૌલિકદેહવાન્ ॥ ૧૨૯॥

માર્જારશ્ચોદ્ધૃતો યેન પૂર્વગોબારગોપકઃ ।
જમ્બૂકશ્ચોદ્ધૃતો યેન પુરા ઠઠૂઠોલકો વણિક્ ॥ ૧૩૦॥

સ્વર્ણાઞ્જનાદયો ભૃત્યા ઉદ્ધૃતા યેન શાર્ઙ્ગિણા ।
શ્યેનઃ સમુદ્ધૃતશ્ચાપિ પુરા યો ભરવાટકઃ ॥ ૧૩૧॥

ચટકાશ્ચોદ્ધૃતાઃ પૂર્વેઽજા યાસ્તં નૌમિ માધવમ્ ।
કપોતા ઉદ્ધૃતા યેન સાર્થવારાસ્તુ યે પુરા ॥ ૧૩૨॥

કાકાસ્તથોદ્ધૃતા યેન પુરા યે કઙ્કુજાતિજાઃ ।
ગૃહગોધોદ્ધૃતા યેન નાણકી પ્રાક્ ખવાસિની ॥ ૧૩૩॥

મૂષકા ઉદ્ધૃતા યેન પ્રાક્ શૂદ્રાઃ સઙ્ઘવાટકાઃ ।
નકુલશ્ચોદ્ધૃતો યેન પ્રાક્ વારુટસ્તુ સાગરઃ ॥ ૧૩૪॥

કીરતારાભિધો ભાટ ઉદ્ધૃતો યેન તં ભજે ।
જ્યોતિર્વેત્તા દેવગતીશ્વરો યેન સમુદ્ધૃતઃ ॥ ૧૩૫॥

પુણ્યવતી ચ તદ્ભાર્યોદ્ધૃતા યેન નમામિ તમ્ ।
બન્દિજનો જયમાનો નૃપશ્ચ વજવિક્રમઃ ॥ ૧૩૬॥

પ્રજાશ્ચાપ્યુદ્ધૃતા યેન વન્દે શ્રીસ્વામિનં હિ તમ્ ।
સમ્રાડબ્ધિસિંહનૃપતિઃ સૂતસ્તસ્ય સુકેસરી ॥ ૧૩૭॥

રાજ્ઞી રક્ષાવતી યેન મોક્ષિતાસ્તં નમામ્યહમ્ ।
માગધો હર્ષનયનો યોગિદાસશ્ચ સેવકઃ ॥ ૧૩૮॥

યેન સૌરભસાવિત્રસ્તામ્બૂલકૃત્ સમુદ્ધૃતઃ ।

રઙ્ગિલો રઙ્ગકારશ્ચ ડમરુકશ્ચ વાદ્યકૃત્ ॥ ૧૩૯॥

ચિહ્નરાયો ભાવસારશ્ચોદ્ધૃતો યેન તં ભજે ।
રમેશ્વરો ગ્રામયાજી તથોદ્ધૃતોઽપિ યેન હ ॥ ૧૪૦॥

સ્વર્ણાસ્તરણો વિદ્યાધ્રશ્ચિત્રબર્હાદયસ્તથા ।
ઉદ્ધૃતાઃ કિન્નરા યેન કિમ્પુમાંસશ્ચ ચારણાઃ ॥ ૧૪૧॥

અસઙ્ખ્યાશ્ચ નૃપા યેનોદ્ધૃતાસ્તં ત્વાં નમામિ ચ ।
નન્દિભિલ્લં હતવાન્ યો રરક્ષ નાગવિક્રમમ્ ॥ ૧૪૨॥

હતં સૈન્યં પુનઃ સઞ્જીવયામાસ નમામિ તમ્ ।
પુરઞ્જયનૃપં હ્યમોક્ષયદ્યસ્તં નમામ્યહમ્ ॥ ૧૪૩॥

મોક્ષિતા યેન બહવઃ સપ્તસ્વર્ગનિવાસિનઃ ।
સપ્તપાતાલવાસાશ્ચ તં નમામિ મહાપ્રભુમ્ ॥ ૧૪૪॥

ઈશ્વરેભ્યશ્ચ ધાર્મિભ્યો દર્શનં યો દદૌ પ્રભુઃ ।
સર્વસ્ત્રીદાસવર્ગાઢ્યસ્તં ભજે પુરુષોત્તમમ્ ॥ ૧૪૫॥

સર્વસ્ત્રીભ્યો નિજાભ્યશ્ચ યુગલાપત્યકાનિ યઃ ।
માનસાનિ દદૌ તસ્મૈ નમઃ શ્રીપરમાત્મને ॥ ૧૪૬॥

માયાપાલો નૃપો મહાનાસ્તિકો યમલોકતઃ ।
મોચિતો યેન કૃષ્ણેન તં ભજે સાધુસત્કૃતિમ્ ॥ ૧૪૭॥

જ્યેષ્ઠપુત્રાય ચ દીલાવરીરાજ્યં દદૌ તતઃ ।
સ્વયં પત્નીં દર્શયિતું યયૌ ધામાઽક્ષરં પ્રતિ ॥ ૧૪૮॥

ધામ નીત્વા નિજાન્ સર્વાન્ સર્વાશ્ચ પ્રમદાસ્તથા ।
પરે ધામ્નિ સ્વીયમૂર્તૌ વાસં દત્વા હ્યરક્ષયત્ ॥ ૧૪૯॥

કુઙ્કુમવાપિકાક્ષેત્રમાગત્ય ત્યાગમાપ્ય યઃ ।
સાધુદીક્ષાં પરિગૃહ્ય વર્તતે સાક્ષિગોચરઃ ॥ ૧૫૦॥

નમામિ સ્વામિને તસ્મૈ શ્રીકૃષ્ણપ્રભવે નમઃ ।
અનાદિશ્રીકૃષ્ણનારાયણાયનાય યોગિને ॥ ૧૫૧॥

યઃ સદા શ્રીહરિશ્ચાસ્તે સપ્તાયતનમૂર્તિમાન્ ।
લીના લક્ષ્મીર્યદઙ્ગેઽહં વર્તે સામપરાયણા ॥ ૧૫૨॥

પ્રજ્ઞા લીના પાશવતી લીના ચ સ્વામિનિ પ્રભૌ ।
યલ્લીલાઃ શ્રેયસે સર્વા જીવાનાં કર્મદેહિનામ્ ॥ ૧૫૩॥

તસ્મૈ તે પતયે ચાપ્યપતયે પ્રણમામ્યહમ્ ।
સર્વદાનીશ્વરવર્યોત્તમાય પરમાત્મને ॥ ૧૫૪॥

નમો વિશિષ્ટરૂપાય સર્વતીર્થાતિતીર્થિને ।
તીર્થાર્થં ભગવન્ સ્વામિન્ લોકકલ્યાણહેતવે ॥ ૧૫૫॥

અભિલાષા જાયતે મે મહાત્મઁસ્તાં પ્રપૂરય ।
અસઙ્ખ્યજન્મભિઃ કૃષ્ણોધ્દૃતાસ્ત્વયા હિ દેહિનઃ ॥ ૧૫૬॥

ધર્મવૃધ્દિઃ કૃતા સર્વા પુનશ્ચાપિ વિભાવય ।
લક્ષ્મીભક્તા બહવોઽત્ર લોકે ભવન્તિ તાન્ પ્રભો ॥ ૧૫૭॥

સાધુરૂપેણ નિર્બન્ધાન્ કૃત્વા મોક્ષય મચ્છ્રિતાન્ ।
ઇત્યર્થયામિ ભગવન્ વિરમામિ ત્વયિ પ્રભો ॥ ૧૫૮॥

ઇત્યુક્ત્વા બદ્રિકે લક્ષ્મીઃ સ્વામિન્યન્તરધીયત ।
લક્ષ્મીસ્તવં પ્રભાષેત ભાવગર્ભોઽપિ યો જનઃ ॥ ૧૫૯॥

લક્ષ્મીવચ્છ્રીહરૌ લીનસ્થાનમેષ્યતિ શાશ્વતમ્ ।
નારી સ્તવમધીયાના લક્ષ્મીઃ સ્યાન્નાત્ર સંશયઃ ॥ ૧૬૦॥

પ્રિયા લક્ષ્મીઃ સ્તવાજ્જાતા જાતા લક્ષ્મીશ્ચ માધવી ।
ભુક્તિં મુક્તિં લભેત્ સ્તોત્રાદ્યથેષ્ટાં પારમેશ્વરીમ્ ॥ ૧૬૧॥

યત્કૃષ્ણસ્ય સમસ્તં વૈ તત્તસ્યાઃ સ્યાત્સમસ્તકમ્ ।
શ્રીકૃષ્ણાર્પણદક્ષાયાઃ કાષ્ણ્યાઃ શ્રીબદ્રિકે સ્વકમ્ ॥ ૧૬૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય ચતુર્થખણ્ડે
૧૨૦-અધ્યાયાન્તર્ગતં લક્ષ્મીકૃતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય ૧૨૦/૬૦-૧૬૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 120/60-162..

Proofread by PSA Easwaran

*Lakshmikritam Shri Krishna Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*